Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 2 | ISSN : 2581- 6306

# काव्ये अलङ्काराणां वैशिष्टयम् नैषधीयचरितमहाकाव्ये अर्थान्तरन्यासालङ्कारविन्यासः



Dr.B.Kamakshamma
Assistant Professor,
Sri Lal bahdur Shastri National Sanskrit University,
New Delhi, India.

**सारांशः** – अलङ्काराणां काव्ये अतीव महत्त्वमस्ति। अत एव –

"**न कान्तमपि निर्भूषं विभाति वनितातननम्**" का.अ.

गुणसम्पन्नाऽपि वनिता अलङ्कारविहीना चेत् न शेभते तथैव रसगुणादियुक्तमपि काव्यम् अलङ्काररहितं चेत् न शोभते। अलङ्कारः शब्दार्थयोः सौन्दर्याधायकं नाम चमत्कारजनकत्त्वं सैव चमत्कृतिः क्वचित् उपमादिरूपेण, क्वचित् अतिशयोक्त्या, क्वचित् वक्रोक्त्या, क्वचित् केवलं शब्दसाम्यमूलकेन अनुप्रासेन द्योत्यते।

यद्यपि काव्यात्मरूपेण न अलङ्कारस्य महत्त्वं तथापि शब्दार्थशरीरस्य काव्यस्य बाह्यसौन्दर्यवर्धनेन समं रसादीनपि पुष्णाति। यथा कटककुण्डलाद्यलङ्काररहितं शरीरं न शोभते तथैव अलङ्कारहीनं काव्यम्। अत एव अलङ्काराणां विषये पूर्वाचार्याणामभिप्रायः शोधपत्रेस्मिन् प्रस्तावितः। तदनु अर्थान्तरन्यासालङ्कारस्य वैशिष्ट्यम्, तस्य स्वरूपं प्रतिपादितम् तदनु नैषधीयचरितमहाकाव्ये अर्थान्तरन्यासालङ्काराः यथाशक्ति प्रतिपादिताः।

**मुख्यशब्दाः** –अलङ्काराः, अर्थान्तन्यासालङ्कारः, नैषधीयचरितम्, काव्यम्।

**अलङ्काराणां वैशिष्ट्यम्** – "अलङ्करोति काव्यमिति अलङ्करः"। "अलङ्क्रियते काव्यम् अनेन" इति वा। अलङ्काराणां काव्ये अतीव महत्त्वमस्ति। अत एव –

"**न कान्तमपि निर्भूषं विभाति वनितातननम्**" का.अ.

गुणसम्पन्नाऽपि वनिता अलङ्कारविहीना चेत् न शेभते तथैव रसगुणादियुक्तमपि काव्यम् अलङ्काररहितं चेत् न शोभते। अलङ्कारः शब्दार्थयोः सौन्दर्याधायकं नाम चमत्कारजनकत्त्वं सैव चमत्कृतिः क्वचित् उपमादिरूपेण, क्वचित् अतिशयोक्त्या, क्वचित् वक्रोक्त्या, क्वचित् केवलं शब्दसाम्यमूलकेन अनुप्रासेन द्योत्यते।

यद्यपि काव्यात्मरूपेण न अलङ्कारस्य महत्त्वं तथापि शब्दार्थशरीरस्य काव्यस्य बाह्यसौन्दर्यवर्धनेन समं रसादीनपि पुष्णाति। यथा कटककुण्डलाद्यलङ्काररहितं शरीरं न शोभते तथैव अलङ्कारहीनं काव्यम्। अत एव अग्निपुराणे उच्यते –

"**अलङ्काररहिता विधवैव सरस्वती**"

**अलङ्कारलक्षणम्** –

**दण्डी - "काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते" ।।का.आ.।।**

**वामनः - "सौन्दर्यमलङ्कारः"** इति अभिदधत् काव्यशास्त्रगतं सर्वमपि सौन्दर्यम् अलङ्कारशब्देन परिगृह्णाति।

"**स दोषगुणालङ्कारहानादानाभ्याम्**" दोषाणां परित्यागात् गुणानाम् अलङ्काराणां चोपादानेन काव्ये सौन्दर्यरूपालङ्कारः जायते।

मम्मटः - "**उपकुर्वन्ति तं सन्तं येङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः**"।।

**विश्वनाथः** – "**शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।**

**"रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्"।।सा.द।।**

अलङ्काराः शब्दार्थयोः शोभावर्धकाः, रसादीनां चोपकर्तारः। प्रसादादिगुणवत् अलङ्काराः न अपरिहार्याः अत एवैते अस्थिरा धर्मा उच्यन्ते इति विश्वनाथः अलङ्काराणां शब्दार्थसौन्दर्यद्वारा रसोपकारकत्वं निर्वक्ति।

**अलङ्काराणां काव्ये स्थानम्** –

विषयेऽस्मिन् विविधाः विप्रतिपत्तयः वर्तन्ते। रीतिवादिनो2लङ्कारवादिनश्च काव्ये अलङ्कारस्य स्थितिमनिवार्यां मन्यन्ते। वामनः वदति –

**"काव्यशोभायाः कर्तारो धर्मा गुणाः"।।का.द.3.1।।**

**"तदतिशयहेतवस्त्वलङ्काराः" ।।का.द.3.2।।**

गुणाः काव्यशोभाजनकाः अलङ्कारास्तु तदतिशयसम्पादनसाधनाः। एवमलङ्काराणां महत्त्वं जायते। ध्वनिवादिनः आनन्दवर्धन-मम्मटादयोऽलङ्काराणां महत्त्वं न स्वीकुर्वन्ति। यथा चोक्तं काव्यलक्षणे मम्मटेन –

**"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वाऽपि" ।।का.प्र.1.4।।**

अत्र अनलङ्कृती पुनः क्वापि इत्यनेन सूच्यते यत् अलङ्काराभावेऽपि काव्ये न कापि क्षतिः।

मम्मटलक्षणं परोक्षतया दूषयन् चन्द्रालोककारो जयदेवोऽभिधत्ते यत् उष्णत्त्वगुणरहितस्य वह्नेः कल्पना यथा हास्यास्पदं भवति तथैव अलङ्काररहितस्य काव्यस्य कल्पना हास्यास्पदा भवति। उक्तं च तेन –

**"अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।**
**असौ न मन्यते कस्मादनुष्णमनलङ्कृती"।।च.आ.1.8।।**

जयदेवः शब्दार्थयोर्मनोहरं सन्निवेशमलङ्कारं स्वीकरोति यथा हारादीनां मनोहरत्वेनाधानम्।

**"सोऽलङ्कारं काव्यस्यानिवार्यधर्मत्त्वेनाङ्गीकरोति।**
**शब्दार्थयोः प्रसिद्ध्या वा कवेः प्रौढिवशेन वा।**
**हारादिवदलङ्कारसन्निवेशो मनोहरः"।।च.आ.5.1।।**

**नैषधीयचरितस्य वैशिष्ट्यम्** – संस्कृत-काव्यवाङ्मयमत्यन्तं विपुलं वर्तते। किन्तु पठनपाठने पञ्चमहाकाव्यानि, बृहत्त्रयी, लघुत्रयी प्रसिद्धानि सन्ति। किरातार्जुनीयम्, शिशुपालवधम्, नैषधीयचरितम् एतत्त्रयं बृहत्त्रयी नाम्ना व्यवह्रियते। एवमेव कुमारसम्भवम्, रघुवंशम्, किरातार्जुनीयम्, शिशुपालवधम्, नैषधीयचरितम् पञ्चैतानि पञ्चमहाकाव्यनाम्ना विख्यातानि। अर्थात् नैषधीयचरितम् बृहत्त्रय्यां, पञ्चमहाकाव्येष्वपि स्थानमाप्नोति। **निषधानां राजा नैषधः, तस्य चरितम् नैषधीयचरितम्। निषधानां राजा नैषधः, नैषधस्य इदं नैषधीयम्, नैषधीयञ्च तच्चरितञ्च नैषधीयचरितम्।** काव्येऽस्मिन् 22 सर्गाः सन्ति। त्रयोदशसर्गे 56 श्लोकाः, पञ्चदशसर्गे 93श्लोकाः, विंशतिसर्गे 67 श्लोकाः सन्ति। अवशिष्टसर्गेषु शताधिकश्लोकास्सन्ति। किन्तु सप्तदशसर्गे 222 श्लोकास्सन्ति। अस्मिन्नाहत्य श्लोकसंख्या 2828। काव्येऽस्मिन् नलः नायकःदमयन्ती नायिका अङ्गिरसः शृङ्गारः। सप्तदशसर्गपर्यन्तं विप्रलम्भः, तदनु सम्भोगशृङ्गारः वर्णितः वर्तते। करुणादयः अङ्गरसाः तत्तत्सन्दर्भानुसारं वर्णिताः। अस्मिन् नायकः नलः धीरोदात्तः। काव्येऽस्मिन् नायिका-नायकमेलने हंसः अत्यन्तं प्राधान्यं वहति। **नैषधं विद्वदौषधम्** इति

**तावद्भाभारवेर्भाति यावन्माघस्य नोदयः।**
**उदिते नैषधे काव्ये क्व माघः क्व च भारविः।।**

इत्यादीनि वचनानि नैषधस्य वैशिष्ट्यं प्रतिपादयन्ति।

**नैषधीयचरितकर्तुः परिचयः** – नैषधीयचरितमहाकाव्यस्य कर्ता श्रीहर्षः। अस्य पिता श्रीहीरः, माता मामल्लदेवी अथवा अल्लदेवी। विषयोऽयं काव्येऽस्मिन् प्रतिसर्गस्यान्ते दृश्यते। यथा -

**श्रीहर्षः कविराजराजिमुकुटालङ्कारहीरः सुतम्।**
**श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।।**

**इतरकृतयः**–

**विजयप्रशस्तिः**- बौद्धानां प्रसिद्ध-क्षणिकवादस्य खण्डनम्

**खण्डनखण्डखाद्यम्** – न्यायशास्त्रस्य खण्डनम् अद्वैतस्य मण्डनम्

**गौडोर्वीशकुलप्रशस्तिः** – एकस्य राज्ञः प्रशस्तिवर्णनम्

**अर्णववर्णनम्** – समुद्रवर्णनम्

**छिन्दप्रशस्तिः** – छिन्दनामकस्य राज्ञः वर्णनम्

**शिवशक्तिसिद्धिः** – शिव-शक्त्योः सिद्धिः

**नवसाहसाङ्कचरितम्** – नवसाहसाङ्कबिरुदाङ्कितस्य सिन्धुराजस्य वर्णनम् विस्तरभयात् विरमामि।

**अर्थान्तरन्यासालङ्कारः -** विश्वनाथः स्वकीयसाहित्यदर्पणे दशमपरिच्छेदे अर्थान्तरन्यासस्य लक्षणं भेदांञ्च प्रतिपादयति यथा -

**सामान्यं वा विशेषेण विशेषस्तेन वा यदि।**

**कार्यं च कारणेनेदं कार्येण च समर्थ्यते।।**

**साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः।। ।।सा.द.10 प. का.61,62,।।**

साधर्म्येण वैधर्म्येण वा यदि विशेषेण सामान्यं समर्थ्यते, अथवा सामान्येन विशेषः समर्थ्यते, कारणेन कार्यं समर्थ्यते अथवा कार्येण कारणं समर्थ्यते चेत्तर्हि सः अर्थान्तनन्यासालङ्कारः इत्युच्यते। एवं सः अर्थान्तनन्यासः अष्टप्रकारो भवति। अर्थात् –

1. साधर्म्येण विशेषेण सामान्यस्य समर्थनम्
2. वैधर्म्येण विशेषेण सामान्यस्य समर्थनम्
3. साधर्म्येण सामान्येन विशेषणस्य समर्थनम्
4. वैधर्म्येण सामान्येन विशेषणस्य समर्थनम्
5. साधर्म्येण कारणेन कार्यस्य समर्थनम्
6. वैधर्म्येण कारणेन कार्यस्य समर्थनम्
7. साधर्म्येण कार्येण कारणस्य समर्थनम्
8. वैधर्म्येण कार्येण कारणस्य समर्थनम्

मम्मटः स्वकीये काव्यप्रकाशे दशमोल्लासे अर्थान्तरन्यासस्य लक्षणं, भेदांञ्च प्रतिपादयति यथा -

**सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।**

**यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा।। ।।का.प्र.द.उ.का.सं.109।। 22 तमालङ्कारः।।**

सामान्यं वा विशेषो वा तदन्येन साधर्म्येण इतरेण वा यत् समर्थ्यते सःअर्थान्तरन्यासः।

साधर्म्येण सामान्येन विशेषस्य समर्थनं वा वैधर्म्येण सामान्येन विशेषस्य समर्थनम् अथवा साधर्म्येण विशेषेण सामान्यस्य समर्थनं वा वैधर्म्येण सामान्येन विशेषस्य समर्थनं वा अर्थान्तरन्यासालङ्कारः इत्युच्यते। अर्थात् -

1. साधर्म्येण विशेषेण सामान्यस्य समर्थनम्
2. वैधर्म्येण विशेषेण सामान्यस्य समर्थनम्
3. साधर्म्येण सामान्येन विशेषस्य समर्थनम्
4. वैधर्म्येण सामान्येन विशेषस्य समर्थनम्

इत्थं मम्मटः अर्थान्तरन्यासस्य भेदचतुष्टयमेव प्रतिपादयामास।

प्रथमसर्गे कविः श्रीहर्षः नलस्य विरहातिशयं वर्णयन् कथयति –

**स्मरोपतप्तोपि भृशं न स प्रभु**

**विंदर्भराजं तनयामयाचत।**

**त्यजत्यशूञ्शर्म च मानिनो वरं**

**त्यजन्ति न त्वेकमयाचितव्रतम्।।नै.च 50 /1।।**

निषधदेशस्य राजा नलः अत्यन्तं कामपीडितोऽपि दमयन्त्याः वियोगात् अतिशयं दुःखमनुभवन्नपि विदर्भराजस्य समीपं गत्वा त्वत्पुत्रीं दमयन्तीं मह्यं प्रयच्छेति न याचितवान्। मनस्विनः सुखं प्राणांश्च आनन्देन त्यजन्ति किन्तु अयाचनानियमं न त्यजन्ति। अर्थात् मनस्विनां प्राणत्यागदुःखादपि याचनादुःखं दुःसहं भवतीति भावः।

नलः विदर्भराजं न याचितवान् इति विशेषः

मनस्विनः अयाचनानियमं न त्यजन्तीति सामान्यम्।

नले मनस्विषु च अयाचनं समानो धर्मः । विशेषेण सामान्यस्य समर्थनं कृतमस्तीत्यतः अत्र साधर्म्येण विशेषणेन सामान्यस्य समर्थनरूपः अर्थान्तरन्यासः।

नैषधीयचरितमहाकाव्ये द्वितीयसर्गे नलहंससंवादसन्दर्भे हंसः – हे राजन्! अहं दमयन्तीमुपेत्य तव प्रसंशां करिष्ये येन तस्याः मनसि पतित्वेन स्थापितः भवान् इन्द्रेणापि न दूरीकर्तुं शक्यते इत्युक्त्वा इतोऽपि वदति – अस्मिन् कार्ये भवतः अङ्गीकारं ज्ञातुमेव इदं निवेदनं मया कृतम्। मम एतन्निवेदनं धिक् । यतो हि सज्जनाः उपकारभावं कार्येण बोधयन्ति न तु कण्ठेन इत्यवोचत्। यथा -

**तव सम्मतिमत्र केवलामधिगन्तुं धिगिदं निवेदितम्।**

**ब्रुवते हि फलेन साधवो न तु कण्ठेन निजोपयोगिताम्।। 48 /2**

अस्मिन् श्लोके अहं उपकारभावं कण्ठेन प्रकटीकरोमि अतः धिक् इति विशेषः।

सज्जनाः उपकारभावं फलेन बोधयन्ति न तु कण्ठेन इति सामान्यः।

अत्र हंसः उपकारभावं कण्ठेन प्रतिपादयति, मनस्विनः कण्ठेन न प्रतिपादयन्ति (किन्तु कार्येण) विरुद्धधर्मः प्रतिपादितः। अतः वैधर्म्येण सामान्येन विशेषस्य समर्थनं कृतमस्तीत्यतः अर्थान्तन्यासालङ्कारः।

नलहंससंवादसन्दर्भे नलः हंसमुद्दिश्य - कामबाणमनोव्यथासमुद्रे निमज्जतः मम विधिना आकस्मात् सृष्टा नौका इव त्वं समागतः। भवतः स्वतः कर्तृत्वात् मदीया प्रेरणा पिष्टपेषणरूपेणैव भवति। यतो हि ज्ञानानां प्रामाण्यं स्वतः एव भवति(मीमांसकानां मते ज्ञानस्य स्वतः प्रामाण्यम्) तथैव सज्जनानां परार्थप्रवृत्तिः स्वत एव भवति तत्र प्रवर्तनायाः अपेक्षा नास्ति इति वदति। तद्यथा –

**भवतः प्रवर्तना न कथं पिष्टमियं पिनष्टि नः।**

**स्वत एव सतां परार्थता ग्रहणानां हि यया यथार्थता।। नै.च.61 /2**

मदीया प्रेरणा पिष्टपेषणमेव भवति इति विशेषः।

सज्जनानां परार्थप्रवृत्तिः स्वतः एव भवति इति सामान्यम्।

अत्र सामान्येन विशेषस्य समर्थनं कृतमस्तीति कारणतः अर्थान्तरन्यासालङ्कारः।

नैषधीयचरिते तृतीयसर्गे हंसः दमयन्त्यीमुपेत्य – हे राजकुमारि ! मन्दाकिनीसुवर्णकमलिनीनां काण्डबिसाग्रभागान् भुक्त्वा वयम् आहारसदृशं शरीरवर्णं प्राप्तवन्तः। (मम सुवर्णशरीरस्य कारणम् आहार एव)। यतो हि कार्यम् उपादानकारणात् रूपादिविशेषगुणान् प्राप्नोति।

**हेममृणालिनीनां नालामृणालाग्रभुजो भजामः।**

**अन्नानुरूपां तनुरूपऋद्धिं कार्यं निदानाद्धि गुणानधीते।। 17 /3**

सुवर्णकमलिनीनां काण्डबिसाग्रभागखादनमेव मम सुवर्णशरीरस्य कारणम् इति विशेषः

कारणमनुसृत्यैव कार्यस्य रूपादिविशेषगुणाः भवन्तीति सामान्यम्

अत्र सामान्येन विशेषस्य समर्थनं कृतम्। अतः अर्थान्तरन्यासालङ्कारः।

नैषधीयचरिते तृतीयसर्गे हंसः सर्वं वक्तव्यमुक्त्वा दमयन्ती नले सानुरागा अस्ति न वेति जिज्ञासुः सन् तूर्ष्णीं बभूव । यतो हि सन्तः कार्यज्ञाः गभीरे चित्ते प्रविश्य अभिप्रायं ज्ञात्वैव कार्यस्य प्रस्तावं कुर्वन्ति, एवं जलाशये च प्रविश्य गाम्भीर्यं ज्ञात्वैव सरसि अवतरन्ति। गाम्भीर्यं अज्ञात्वा अवगाहं क्रियते अनर्थः भवेदिति भावः। तद्यथा -

**इतीरयित्वा विरराम पत्त्री स राजपुत्रीहृदयं बुभुत्सुः।**

**ह्रदे गभीरे हृदि चावगाढे शंसन्ति कार्यावतरं हि सन्तः।। नै.च.53 / 3।।**

अत्र हंसः वक्तव्यमुक्त्वा दमयन्ती नले सानुरागा अस्ति न वेति जिज्ञासुः सन् तूर्ष्णीं बभूव इति विशेषः।

सन्तः चित्ते प्रविश्य अभिप्रायं ज्ञात्वैव कार्यस्य प्रस्तावं कुर्वन्ति इति सामान्यम्।

साधर्मेण विशेषेण सामान्यस्य समर्थनं कृतमित्यतः अत्र अर्थान्तन्यासालङ्कारः।

नैषधीयचरिते तृतीयसर्गे हंसः दमयन्तीमधिकृत्य स्वमनसि इत्थं चिन्तयति - भवत्याः नलपाणिग्रहणे अभिलाषा, भवत्याः मनः नलं कामयते इति विषयद्वयं ज्ञात्वापि भवत्याः मनसः अस्थिरत्वमाशङ्क्य अनभिज्ञः एव अस्मि। यतो हि चञ्चलस्वभावे तरुण्याः चित्तरूपलक्ष्ये देवर्ष्यादिविजेता कामदेवोऽपि च्युतसायकः अर्थात् ईषत्साहाय्यं कर्तुमपि असमर्थ एव भवति खलु इति चिन्तयति। तद्यथा -

**त्वच्चेतसः स्थैर्यविपर्ययं तु**
**सम्भाव्य भाव्यस्मि तदज्ञ एव।**
**लक्ष्ये हि बालाहृदि लोलशीले**
**दरापराद्धेषुरपि स्मरः स्यात्।। नै.च.70 / 3**

भवत्याः मानसं ज्ञात्वापि अज्ञानी एवास्मि इति विशेषणम्
चञ्चलस्वभावतरुणीनां मालनं प्रकटयितुं स्मरोपि असमर्थ इति सामान्यम्
अत्र विशेषणेन सामान्यस्य समर्थनं कृतमिति हेतोः अर्थान्तरन्यासालङ्कारः।।

नैषधीयचरितमहाकाव्ये तृतीयसर्गे नलः हंसमुद्दिश्य वदति – परवति(पराधीने) हे दमयन्ति त्वां किमपि न वदामि। हे हंस त्वं शीघ्रं समीपमागच्छ। दमयन्ती मां किंमाह इति कथय। एवं वदति नले हंसः समीपमागतस्सन् जातवृत्तान्तं सर्वं निवेदयामास। यतो हि पुण्यात्मनां अभीष्टवस्तुप्राप्त्यर्थं निज-इच्छायाः एव विलम्बः भवति। न तु इच्छानन्तरं तत्फलप्राप्तेः विलम्बः इति। तद्यथा -

**परवति दमयन्ति त्वां न किञ्चिद्वदामि**
**द्रुतमुपनम किं मामाह सा शंस हंस!**
**इति वदति नलेऽसौ तच्छशंसोपनम्रः**
**प्रियमनु सुकृतां हि स्वस्पृहाया विलम्बः।। 134 / 3 ।।**

नलस्य हंसस्मरणमात्रेण हंसः प्रत्यक्षो जातः इति विशेषणम्।
पुण्यात्मनाम् अभीष्टवस्तुप्राप्त्यर्थं निज-इच्छायाः एव विलम्बः इति सामान्यम्।
अत्र विशेषणे सामान्ये च साधर्म्यं वर्तते। अपि च सामान्येन विशेषणस्य समर्थनं कृतमस्तीत्यतः अत्र अर्थान्तरन्यासालङ्कारः।

नैषधीयचरितमहाकाव्ये प्रतिसर्गम् अर्थान्तरन्यासालङ्काराः दरीदृश्यन्ते। विस्तरभयात् स्थालीपुलाकन्यायेन अत्र केचन एव उदाहृताः इति शम्।।

**सङ्केताक्षरसूची**

का.अ. – काव्यालङ्कारः
का.आ – काव्यादर्शः
सा.द. – साहित्यदर्पणः
का.प्र. – काव्यप्रकाशः
नै.च. - नैषधीयचरितम्

**सन्दर्भग्रन्थसूची**

**1.काव्यालङ्कारः**
बालानन्दिन्याख्यया आन्ध्रभाषाव्याख्यया समेतः
संस्कृतभाषाप्रचारसमितिः
हैदराबाद्
संस्करणम् – 2004

**2.काव्यादर्शः**
चौखम्बा विद्याभवन
वाराणसी – 221001

**3.साहित्यदर्पणः – विश्वनाथ कविराज**
Chandrakala hindi commentaries
Acharya shesharaja Sharma regmi
Chowkhamba Krishnadas Academy
Varanasi

संस्करण – 2016

**4.काव्यप्रकाशः**

बालानंदिनी तेलुगु व्याख्यासहित

संस्कृतभाषाप्रचारसमिति – हैदराबाद 500001

द्वितीयमुद्रण – 2009

**5.नैषधीयचरितम्** – **श्रीहर्ष**

चन्द्रकला संस्कृत-हिन्दीव्याख्यासहित

श्रीशेषराजशर्मा रेग्मी

चौखम्बा सुरभारती प्रकाशन

वाराणसी – 221001

संस्करण - 2016